# Parameshvara Stotram

# પરમેશ્વરસ્તોત્રમ્ ૪

## Document Information

Text title : Parameshvara Stotram

File name : parameshvarastotram4.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 1/1-10||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# પરમેશ્વરસ્તોત્રમ્ ૪

શ્રીશ્વેતાયનવ્યાસ ઉવાચ ।
ૐ નમો યુગરૂપાય નમસ્તિષ્યાદિમોક્ષિણે ।
બાલયોગિનીનાથાય નમસ્તે બાલયોગિને ॥ ૧॥

નમોઽસઙ્ખ્યચરિત્રાય નમશ્ચાનન્દવાર્ધયે ।
નમસ્તે બાલકૃષ્ણાય બાલાન્તરાત્મને નમઃ ॥ ૨॥

ચિદચિદ્વપુષેઽનાદિશ્રીકૃષ્ણાય નમો નમઃ ।
બદ્રિકાપતયે નરનારાયણાત્મને નમઃ ॥ ૩॥

સર્વસૌખ્યવિધાત્રે તે સર્વધર્માધિકારિણે ।
યાવલ્લીલાદિવાસ્યાય નમસ્તે સાધુરૂપિણે ॥ ૪॥

સાધ્વીશક્તિસુમિશ્રાય સ્વર્ણરેખાજટાધૃગે ।
એકરસસ્વરૂપાય સરોજનીજુષે નમઃ ॥ ૫॥

એકધા દશધા સહસ્રધા કોટ્યર્બુદાબ્જધા ।
કાન્તાકાન્તોઽન્વિતશ્ચાસ્તે પૃથક્ ચાપિ ચ તે નમઃ ॥ ૬॥

યો દધાર તુ રાધાયાઃ કૃતે કૃષ્ણં નિજં વપુઃ ।
યશ્ચ શ્રિયઃ કૃતે નારાયણો નારાયણેશ્વરઃ ॥ ૭॥

યશ્ચ રમ્યં વાસુદેવં વ્યૂહં દધાર સૃષ્ટયે ।
યશ્ચ હિરણ્મયં રૂપં વિષ્ણુરૂપં દધાર ચ ॥ ૮॥

તથા તિષ્યાઽર્દિતાનાં તૂદ્ધારાય તાપસાં વપુઃ ।
ધર્માદ્દધાર ભગવાન્ નરનારાયણાત્મકમ્ ॥ ૯॥

સર્વથા કરુણાપૂર્ણં સાધુશીલસમન્વિતમ્ ।
મુક્તર્ષિસેવિતં શાન્તં તં નમામિ પરેશ્વરમ્ ॥ ૧.૧૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે

પ્રથમાધ્યાયન્તર્ગતં પરમેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૧/૧-૧૦ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 1/1-10..

Proofread by PSA Easwaran

*Parameshvara Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*